# सोपसर्गक्रियापदरचनाविमर्शः

टीकारामदहालः *[१]

**सारः**

*उपसर्गाश्च वैदिककालादेव पदविभागेषु परिगणिताः सन्ति । प्र-परा-अप-समित्यादय उपसर्गाः क्रियावाचिभ्यः धातुभ्यः (क्रियापदेभ्यः) पूर्वं संयोजिताः भवन्ति । धातोः क्रियापदस्य रचनानन्तरं विशेषार्थाभिव्यञ्जनाय धातोः पूर्वमुपसर्गाः संयुज्यन्ते । पूर्वं धातुः साधनेन तिङ्प्रत्ययेन युज्यते पश्चात्तदर्थद्योतकेनोपसर्गेण युज्यते इति सिद्धान्तः वर्तते । उपसर्गाः न हि स्वतन्त्रमर्थमावहन्ति, एते तु धातोरर्थमेव द्योतयन्ति, परिवर्तयन्ति, परिवर्धयन्ति च । धातवः उपसर्गाश्चानेकार्थाः स्मृताः सन्ति । एतयोरर्थस्यानिश्चितत्वादेवैते ऽनेकार्था उक्ताः स्युः । सर्वेषां शब्दानां, सर्वेषां क्रियापदानां मूलरूपः धातुरेव विद्यते । धारयति पोषयति इति धातुरिति व्युत्पत्या सर्वेषां पदानामाधारभूतः पोषकः, तत्त्वरूपः शब्दराशिः धातुरिति शब्दस्यार्थः भवति । धातुः शब्दस्यार्थो धारयिता पोषयिता वा भवति । एतेन धातुः नहि केवलक्रियापदस्यापि तु सर्वेषां पदानाञ्चाधारभूतः परिपोषको वर्तते । धातवः दशसु गणेषु विभज्य पठिताः सन्ति । कर्मग्रहणदृशा सकर्मकाकर्मकद्विकर्मकाश्च धातवः भवन्ति । व्युत्पादनदृशा धातवः, औपदेशिका आतिदेशिकाश्च भवन्ति । औपदेशिकाः धातवः दशगणेषु सम्बद्धाः धातुपाठे पठिताः सन्ति । सकर्मकत्वञ्च फलव्यधिकरणव्यापारवाचकत्वं वर्तते । नियमेन यस्यार्थस्य कर्मसंज्ञा भवति तस्यार्थेन सह धात्वर्थस्यान्वयो भवति, स धातुः सकर्मको भवति । धात्वर्थयोः फलव्यापारयोः भिन्नाश्रये भिन्ननिष्ठतायां वा धातुः सकर्मकः भवति । अकर्मकत्वञ्च फलसमानाधिकरण-व्यापारवाचकत्वमकर्मकत्वं वर्तते । धात्वर्थफलव्यापारयोः एकनिष्ठतायामेकाश्रये वा धातुरकर्मको भवति अर्थात् फलव्यापारौ यत्र एकैव स्थाने तिष्ठतश्चेत् स अकर्मकः धातुरिति कथ्यते । विशिष्टार्थाभिव्यक्तये धातुना सह उपसर्गस्य योगः क्रियते । उससर्गसहिता क्रिया सोपसर्गा कथ्यन्ते । एतेनानेकेषां धातूनां रूपावली ज्ञाने लाघवो भवति । भावाभिव्यक्तये सारल्यतामावहति । भाषा च परिष्कृता भवति । अतोऽत्र सोपसर्गक्रियापदरचनाविधिः तदर्थश्च सोदाहरणं विश्लिष्यते ।*

**शब्दकुञ्जिका -** उपसर्गः, सोपसर्गः , पदविभागः, सकर्मकः, तिङ्प्रत्ययाः, सुप्प्रत्ययाः ।

## १. विषयपरिचयः

धातुभ्यः तिङ्प्रत्ययस्य संयोजनेन क्रियापदस्य रचना भवति । क्रियापदानि क्रियात्मकर्थं प्रकटयन्ति । वाक्ये कर्तृ-कर्म-करण-सम्प्रदानमपादानादयः कारकाः क्रियया सह समन्वयं स्थापयित्वार्थं प्रकटयन्ति । पदविभागेषु क्रियापदविभागः प्राचीनतरः प्रसिद्धश्च वर्तते । ततः इदानीं यावत् विविधासु भाषासु च क्रियापदनाम्नैव प्रसिद्धः व्यवहृतश्च दृश्यते । पाणिनेः सुप्तिङन्तं पदम् (पा.सू १।४।१४) सूत्रं सुबन्तपदनाम्ना नाम-सर्वनाम-विशेषणाव्ययपदानि बोधयति तथा तिङन्तपदनाम्ना क्रियापदानि

* *उपप्राध्यापकः ने.सं.वि. पिण्डेश्वरविद्यापीठम् धरानः ।*

बोधयति । वाक्येषु क्रियापदानामुपस्थितेरनिवार्यता भवति । प्राचीनतः इदानीं यावत् भाषायां क्रियापदस्य स्थानं महत्वपूर्णं विद्यते । धातोः तिङ्प्रत्ययस्य च संयोजनेन क्रियापदस्य रचना भवति ।

उपसर्गाश्च प्राचीनत एव पदविभागेषु गणिताः सन्ति । प्र-परा-अप-समित्यादय उपसर्गाः क्रियावाचिभ्यः धातुभ्यः निर्मितस्य क्रियापदस्य पूर्वं संयोजिताः भवति । क्रियापदस्य रचनानन्तरं विशेषार्थाभिव्यञ्जनाय धातोः पूर्वमुसर्गाः संयुज्यन्ते । उपसर्गाः न हि स्वतन्त्रमर्थमावहन्ति, एते तु धातोरर्थमेव द्योतयन्ति, परिवर्तयन्ति, परिवर्धयन्ति च । धातवः उपसर्गाश्चानेकार्थाःस्मृताः सन्ति । एतयोरर्थसनिश्चितत्वादेवैतेऽनेकार्था उक्ताः स्युः । सोपसर्गात्मकानि क्रियापदानि भाषासु भाषिकं सौष्ठवमापयन्ति । उपसर्गाः जनान् स्वल्पप्रयासेनैव विविधार्थप्रकटने क्षमाणां क्रियापदानां रचनाय प्रयोगाय च भाषिकाभिव्यक्तये च सहाय्यं विदधन्ति ।

## २. समस्याकथनम्

अस्मिन्नालेखे उपसर्गैः क्रियापदस्य संरचने दृष्टा समस्या एवालेखस्यापि मुख्या समस्या विद्यते । अथालेखस्य प्रमुखाः समस्याः प्रस्तूयन्ते -

क. धातूनामुपसर्गयोः परिचयः कः ? प्रकाराश्च के सन्ति ?

ख. सोपसर्गक्रिपदरचनारीतिः कीदृशी ?

## ३. उद्देश्यम्

एतस्मिन्नालेखे धातो उपसर्गाणाञ्च परिचयनिदर्शनपुरस्सरं तयोः संयोजनं कृत्वा क्रियापदरचनाकौशल-मभिवर्धनमेवास्य मुख्यमुद्देश्यमस्ति । अत्र सामान्यतः प्रमुखैः धातुभिस्तथा प्रमुखैरुपसर्गैः निर्मितानि क्रियापदानि तथा तेषामर्थनिदर्शनं विधीयते । अध्ययनमेतत् निम्नाङ्कितयोः उद्देश्ययोः केन्द्रितमस्ति -

क. धातूनामुपसर्गाणाञ्च परिचयोपस्थापनपूर्वकं प्रकारनिदर्शने ।

ख. धातूपसर्गयोः संयोजनेनार्थनिर्दशनपूर्वकं क्रियापदरचनारीति प्रस्तोतने ।

## ४. अध्ययनविधिः सीमा च

एतस्मिन्नध्ययने पुस्तकालयीयानां सामग्रीणामुपयोगो विहितो विद्यते । धातूपसर्गसम्बद्धानि पुस्तकानि, विचाराः, लेखाश्चात्र सङ्कलनं विधाय प्राप्तानां सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेः प्रयोगो विहितोऽस्ति । संक्षेपेण सोदाहरणं सोपसर्गक्रियापदानामर्थनिदर्शनपूर्वकं क्रियापदरचनाविधेः निरूपणमेवास्य सीमा विद्यते ।

## ५. धातोः परिचयः

धारणपोषणार्थकात् डुधाञ् (धा) धातो औणादिके तुन्-प्रत्यये सति धातुरिति पदं निष्पद्यते । सर्वेषां शब्दानां, सर्वेषां क्रियापदानां मूलरूपः धातुरेव विद्यते । धारयति पोषयति इति धातुः इति व्युत्पत्या सर्वेषां पदानामाधारभूतः पोषकः, तत्त्वरूपः शब्दराशिः धातुरिति शब्दस्यार्थः भवति । धातुः शब्दस्यार्थो धारयिता पोषयिता वा भवति । एतेन धातुः नहि केवलक्रियापदस्यापि तु सर्वेषां पदानाञ्चाधारभूतः परिपोषको विद्यते । भू पठ् गम् चर् इत्यादयः भू प्रभृतयो वासदृशाः क्रियावाचका

धातवः सन्ति [३०] । सर्वं च नाम धातुजमाह नामानि आख्यातानि च इति प्रसिद्धनिरुक्तवचनात् सकलशब्दमूलं धातुरेव विद्यत इति स्पष्टं भवति ।

### ५.१. धातोर्भेदाः

गणपाठानुसारेण धातवः दशसु गणेषु विभज्य पठिताः सन्ति । रूपायनगता भिन्नता एव गणविभागस्य कारणं दृश्यते । कर्मग्रहणदृशा सकर्मकाकर्मकद्विकर्मकाश्च धातवः भवन्ति । व्युत्पादनदृशा धातवः, औपदेशिका आतिदेशिकाश्च भवन्ति । औपदेशिकाः धातवः दशगणेषु सम्बद्धाः धातुपाठे पठिताः सन्ति । औपदेशिकानां धातूनां "भूवादयो धातवः" (पा.सू. १।३।१) इति सूत्रेण धातुसंज्ञा भवति । सनादिभिः प्रत्ययैः व्युत्पन्नाः धातव आतिदेशिकाः व्युत्पन्नाः कथ्यन्ते । "सनाद्यन्ता धातवः" (पा.सू. ३।१।३२) सूत्रेण सनाद्यन्ताः समुदायाः आतिदेशिकाः धातवः धातुत्वमाप्नुवन्ति । धातोः प्रकाराणां निदर्शनप्रसङ्गे विविधरूपेणाध्ययनं कर्तुं शक्यते । धातुमनेकेष्वाधारेषु विविधप्रकारेण च विभक्तुं शक्यते । अत्र धातोः गणानुरूपम्, व्युत्पादनानुरूपम्, कर्मग्रहणानुरूपञ्च दृष्टानां प्रकारणामध्ययनं विधीयते ।

### ५.२. धातोः गणपाठः

गणो नाम समूहः, धातुपाठे धातवः रूपायनस्य भिन्नतामाश्रित्य समूहं समूहमाश्रित्य पठिताः सन्ति । गणपाठे धातवो भ्वादि-अदादि-जुहोत्यादि-दिवादि-क्र्यादि-तनादि-स्वादि-तुदादि-रुधादि-चुरादि गणनाम्ना दशसु गणेषु विभज्य पठिताः दृश्यन्ते । धातूनां पाठस्य क्रमे एव गणविभागमप्याचार्येण पाणिनिना विहितमिति ज्ञायते एतेन । पाणिनिना धातवः तेषां प्रसिद्धार्थाश्च तत्र निर्दिष्टाः आसन् । केचन विद्वांसस्तु पाणिनिना प्रथमः भू , एध् , हु, अद् , तुद्, तनु इत्यादिक्रमेण धातुपाठः निर्मितः, पश्चादन्ये वृत्तिकाराः तत्र सत्तायामित्याद्यर्थान् संयोजयामासुः इत्यपि कथयन्ति । पाणिनेः मूलधातुपाठस्येदानी-मनुपलब्धत्वाद् एतदपि सम्भवेत् । गणपाठानुसारेण धातवः दशगणेषु विभक्ताः विद्यन्ते । अयमत्र गणसङ्ग्रहः -

"भ्वाद्यदादिः जुहोत्यादिः दिवादिः स्वादिरेव च<br>
तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः ॥" ( नौटियाल, ई.सं.१९८८ : पृ.२१७)

भ्वादिगणे भू धातोरारभ्य सहस्रसंख्यकाः धातवः पठिताः सन्ति । अत्र शप् (अ) विकरणप्रत्ययो भवति । अद् धातोराभ्यप्रारब्धे अदादिगणे शपो लुक् भवति । हु धातोराब्धे जुहोत्यादिगणे शपः श्लोआदेशेन धातोः द्वित्वं भवति । दिव् धातोरारब्धे दिवादिगणे श्यन् , स्वादिगणे श्नुः, तुदादिगणे शः, रुधादिगणे श्नम्, तनादिगणे उः, चुरादिगणे (णिच्) शप् विकरणप्रत्ययाः भवन्ति ।

### ५.३. कर्मग्रहणदृशा धातूनां प्रकाराः

केचनाः धातवः कर्मपदं गृह्णन्ति, केचनाः च न गृह्णन्ति । कर्मग्रहणदृशा एतेन कर्मग्रहणाधारेण वा धातवः सकर्मकाकर्मकभेदेन द्विधा विभज्यन्ते । धात्वर्थौ फलव्यापारौ स्तः । तत्र फलाश्रयं कर्म तथा व्यापाराश्रयश्च कर्ता भवति ।

---

३० भूवादयो धातवः (पा.सू.१।३।१।)।

**५.३.१. सकर्मका धातवः**

कर्मसहिता धातवः सकर्मकाः सन्ति । सकर्मकत्वञ्च फलव्यधिकरणव्यापारवाचकत्वं वर्तते । नियमेन यस्यार्थस्य कर्मसंज्ञा भवति तस्यार्थेन सह धात्वर्थस्यान्वयो भवति, स धातुः सकर्मको भवति। धात्वर्थयोः फलव्यापारयोः भिन्नाश्रये भिन्ननिष्ठतायां वा धातुः सकर्मकः भवति । (भट्टः, १९८७ : पृ.१०४) । यथा गम-पठ्-पच्-दृश्-पा-प्रच्छादयः । उदाहरणं यथा बालकः पाठं पठति । अत्र फलव्यापारयोः भिन्नत्वेन पठ् धातुः सकर्मक इति । अत्र पाठशब्दस्य कर्मसंज्ञा भवति तस्यार्थेन सह पठ्धात्वर्थस्यान्वयो जायते । तस्मात् कारणात् पठ् धातुः सकर्मक इति ज्ञायते ।

दुह्, याच्, पच् इत्यादयस्तथा सकर्मकाः णिजन्ताः धातवश्च द्विकर्मकाः भवन्ति । एते द्वे कर्मपदे गृह्णीतः । तस्मात् द्विकर्मका उच्यन्ते । एते च सकर्मकभेदा एव । गोपालः गां दोग्धि पयः । गुरुः छात्रान् कथां श्रावयति ।

**५.३.२. अकर्मकाः धातवः**

येषां धातूनां कर्म न सम्भवति ते ऽकर्मकाः धातवः सन्ति । फलसमानाधिकरण-व्यापारवाचकत्वमकर्मकत्वं वर्तते । धात्वर्थफलव्यापारयोः एकनिष्ठतायाम् एकाश्रये वा धातुरकर्मको भवति (भट्टः, १९८७ : पृ.१०४) । अर्थात् फलव्यापारौ यत्र एकैव स्थाने तिष्ठतश्चेत् सोऽकर्मकः धातुरिति कथ्यते । यथा- भू-एध्-हस्-रुद्-नृतादयः । उदाहरणं यथा- रामः हसति । अत्र धात्वर्थयोः फलव्यापारयोरभिन्नत्वेन हस्धातुरकर्मक इति ज्ञायते ।

यथा- बालकः नृत्यति । नृत्यतीत्यत्र फलव्यापारसमानाधिकरणवाचकत्वेन नृत् धातुरकर्मक इति ज्ञायते ॥ अकर्मकधातूनां परिगणनप्रसङ्गे श्लोकोऽयं प्रसिद्धो वर्तते-

"लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
नर्तन-निद्रा-रोदन-वासाः स्पर्धा-कम्पन-मोदन-हासाः ।
शयनक्रीडारुचिदीप्त्यर्थाः धातव एते कर्मणि नोक्ताः।" इति (नौटियालः,१९८८ : पृ.२१७)

लज्जा, सत्ता, जागृतिः, वृद्धिः, क्षयाद्यर्थाभिधायकाः धातवोऽकर्मकाः भवन्ति । वधूः जिह्रेति । (लज्जते), बालकः तिष्ठति । (वसति), बालकाः शेरते । विद्युत् द्योतते, इत्यादयः ।

क्वचिदर्थान्तराच्च सकर्मकाः धातवोऽ कर्मकाः तथाकर्मकाश्च सकर्मकाः भवितुं शक्नुवन्ति । यथा भृत्यः भारं वहति इत्यत्र वह् धातुः सकर्मकः वर्तते परन्तु नदी वहति इत्यत्र स्यन्दनार्थः वह् धातुरर्थान्तरादकर्मकः भवति । तथैव मेघो वर्षति । वीरः शरान् वर्षति । तथा चोक्तम् सिद्धान्तकौमुद्याम् -

धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥ इति (सिद्धान्तकौमुदी, चतुर्थो भागः, पृ.८०)

**६. उपसर्गपरिचयः**

उपसर्गाः धातोः प्राक् प्रयुज्यन्ते । ते धात्यर्थं विशिनष्टि, परिवर्तयन्ति, परिवर्धयन्ति च । धातोः प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः सन्ति, एते उपसर्गाः निगद्यन्ते । उपसर्गाः क्रियायोगे (पा.सू.१।४।४९) सूत्रेण एते यदा क्रियायोगं प्राप्नुवन्ति, धातुभिः संगोगमाप्नुवन्ति तदा एते उपसर्गसंज्ञां लभन्ते । लोके एते

उपसर्गनाम्ना प्रसिद्धाः सन्ति । उपसर्गयोगेन एकैव धातु-अनेकमर्थं बोधयति । सोपसर्गक्रियापदप्रयोगेण भाषा सरला सौष्ठवयुता परिष्कृता च भवति ।

एते उपसर्गाः स्वतन्त्रं विशिष्टं वार्थं न बोधयन्ति । एते तु धातोरर्थमेव प्रकाशयन्ति । धातवोऽनेकार्थाः भवन्ति । अत उपसर्गयोगेन तेऽनेकानर्थान्निभिव्यञ्जयन्ति । उपसर्गास्तु धात्वर्थस्य द्योतका एव सन्ति । तस्मादेव सकर्मकेभ्यः उपसर्गयोगे ऽकर्मकता च सिध्यति । धातूनामनेर्थत्वादेवाकर्मकात् भू धातोरनुभवार्थमादाय सकर्मकं मत्वा कर्मणि लकारः उत्पद्यते । उपसर्गेण धात्वर्थस्य नाशनं परिवर्तनं परिवर्धनं वा सम्भवति । तथा चोक्तम्

'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥'

उपसर्गेण धातोः अर्थः बलपूर्वकमन्यत्र अर्थे नीयते । उपसर्गसहयोगेन धातुः स्वमर्थं विहायान्यमर्थं प्रकटयति । तत्र हरणार्थकात् हृ (हृञ् हरणे) धातोः पूर्वं प्र उपसर्गयोगे प्रहरति इत्यादि प्रहरणमर्थः भवति । आ उपसर्गेण योगे भोजनार्थकः आहरति इति भवति । सम् उपसर्गेण योगे संहारार्थः (नाशः) संरहति भवति । वि उपसर्गयोगे भ्रमणार्थः विहरति भवति । परि उपसर्गयोगे निवारणार्थः परिहरति भवति । भिन्नै उपसर्गैः युक्त हृ धातुः भिन्नमर्थं बोधयति तदेतत् स्फुटं भवति । अत्र उपसर्गाः धात्वर्थस्य परिवर्तने सहायकाः दृश्यन्ते । वस्तुतस्तु ते सर्वे हृ धातोरेवार्थाः सन्ति । धातूनामनेकार्थत्वात् । प्रादय उपसर्गास्तु धात्वर्थस्य द्योतकाः एव तस्मात् कारणत् प्रहरति इत्यत्र प्र उपसर्गः हृधातोः प्रहारार्थं द्योतयति ।

उपसर्गाः कदाचित् धात्वर्थस्थस्य बाधकाः कदाचित् धात्वर्थस्यैवानुवर्तकाः कदाचित् धात्वर्थविनाशकाः भवन्ति । एतेनोपसर्गस्य त्रिविधा गतिः परिलक्ष्यते । स्वल्पेनैव श्रमेणानेकानां क्रियापदानां ज्ञानाय सोपसर्गक्रियापदरचनज्ञानमावश्यकं भवति । उपसर्गस्य सहयोगेन एकेनैव धातुनानेके ऽर्था अभिव्यक्ताः भवन्ति ।

### ७. सोपसर्गक्रियापदानां रचना

उपसर्गेण सहिताः धातवः सोपसर्गाः धातवः कथ्यन्ते । तैः धातुभिः निर्मितान्युपससर्गसहितानि क्रियापदानि च सोपसर्गात्मकानि क्रियापदानि चोच्यन्ते । उपसर्गाः धातोः प्राक्प्रयुज्यन्ते । अत्र कतिपयानां प्रसिद्धानां सोपसर्गक्रियादानामर्थनिर्देशनपुरस्सरमुदाहरणं प्रस्तूयते ।

**धातुः धात्वर्थः उपसर्गाः उदाहरणम्**

अर्थ (गतौ याचने च)

प्र+अर्थ (स्तुतिं करोति) भक्तः ईश्वरं प्रार्थयति । शिष्यः गुरुं प्रार्थयति । भृत्यः स्वामिनं प्रार्थयति ।

अभि+अर्थ (प्रार्थनम् ) दरिद्रः धनिकमभ्यर्थयते । सः मामभ्यर्थयते । (याचते)

असू (क्षेपणे)

अभि+अस् - (अभ्यसनम्) छात्रः पाठमभ्यस्यति । सा भाषणयाभ्यस्यति ।

निर्+ अस्- (निवारणम्) सूर्यः तमो निरस्यति । सः धूर्तं निरस्यति ।

आप्लृ (व्यप्तौ)

प्र+ आप्- (लभते) छात्रः पारितोषिकं प्राप्नोति। सः कर्मफलं प्राप्नोति।

वि+आप् -(विस्तरणम्) धूमः आकाशं व्याप्नोति। सज्जनस्य यशः आसंसारं व्याप्नोति।

सम्+ आप् -(समापनम्) सः कार्यं समाप्नोति। यज्ञं समाप्नुवन्ति याज्ञिकाः।

आस (उपवेसने)

अधि+आस् - (वसति) राजा सिंहासनमध्यास्ते। हरिः वैकुण्ठमध्यास्ते।

उप+आस् - (सेवते) भक्ताः हरिमुपासते। वयम् शिवमुपास्महे।

इण् (गतौ)

अव+इ - (ज्ञानम्) माम् इत्थमेवावेहि।

प्रति+इ -(विश्वसनम्) सा मयि न प्रत्येति।

उत्+इ- (उदयनम्) उदेति सविता ताम्रः ताम्रमेवास्तमेति च। (नीति) दूरमुदैति दैवं। सूर्यः पूर्वमुदेति।

उप+इ -(प्रापणम्) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः। (नीतिशतके)

अभि+इ - (सम्मुखी भवनम्) शिष्यः गुरुमभ्येति।

अनु+ इ (अनुकरणम्) सीता शब्दार्थमिव राममन्वेति।

अभि+उप+इ - (समीपगमनम्) छात्रः विद्यालयमभ्युपैति।

ईक्ष (इक्षणे)

अप+ईक्ष् - (अपेक्षणम्) सः सहयोगमपेक्षते।

उप+ ईक्ष् - (अवहेलनम्) दुर्जनः सज्जनमुपेक्षते। अलसः कतर्व्यमुपेक्ष्यते।

परि+ईक्ष् - (परीक्षणम्) स्वर्णम् अग्नौ परीक्ष्यते। सः बालकं युक्त्या परीक्षति।

प्रति+इक्ष् - सः मां प्रतिक्षते। सा प्रियस्यागमनं प्रतीक्षते।

निर्+ईक्ष् - (पर्यावलोकनम् ) निरीक्षकः कार्यालयं निरीक्षते।

डुकृञ् (कृ) (करणे)

प्र+कृ - (वर्णनम्) सः गाथा प्रकुरुते।

प्र+ कृ - (बलात्कारः करणम्) दुष्टः परदारान् प्रकुरुते।

अनु+ कृ - (अनुकरणम्) जनाः नीतिमनुकुर्वन्ति।

उप+ कृ - सः दीनान् उपकरोति।

वि+ कृ - (विकृति) चित्तं विकरोति कामः। दुग्धं विकरोति अम्लः।

परि+कृ - (शोधनम्) सः लेखनं परिष्करोति।

आ+वि+कृ - (अन्वेषणम्) वैज्ञानिकाः रोगस्य औषधमाविष्कुर्वन्ति।

निर्+आ+कृ - (निवारणम्) सूर्यः तमः निराकरोति। बलिष्ठः दुष्टान् निराकरोति।

अलम्, नमस् तिरस् पुरस् एते अव्ययाः सन्ति परन्तु एते अव्ययाः कृ धातोः योगे उपसर्गतां भजन्ते। तद्यथा -

अलम्+कृ- (शोभाकरणम्) छात्राः विद्यालयमलङ्कुर्वन्ति। अलङ्काराः काव्यमलङ्कुर्वन्ति।

नमस्+कृ - (अभिवादनम्) बालकः मातरं नमस्करोति। छात्राः गुरुं नमस्कुर्वन्ति।

तिरस्+कृ - (अवहेलनम्) सः दुर्जनान् तिरस्करोति ।

पुरस् + कृ - (प्रोत्साहनम्) प्रधानाध्यापकः उत्कृष्टान् छात्रान् पुरस्करोति ।

क्रमु (पादविक्षेपे )

अप+क्रम्- (दूरीकरणम्) राक्षसः नगरादपक्रामति ।

सम्+क्रम्- (विस्तरणम्) सङ्कक्रामति रोगः ग्रामे ।

अनु+क्रम् - विद्वान् नीतिमनुक्रामति ।

वि+क्रम् - साधु विक्रमते वाजी । चलति इत्यर्थः ।

आ+क्रम् - आक्रमते सूर्यः । उदेति इत्यर्थः ।

निस्+क्रम् - (बहर्गमनम्) वाद्यन्ते वादनानि ततः निष्क्रामन्ति सर्वे नाट्ये ।

परि+क्रम् - (आवर्तनम्) पुत्रः मातापितरौ परिक्रामति । भक्तः मन्दिरं परिक्रामति ।

क्षिप (प्रेरणे)

आ+क्षिप् (आरोपणम्) किमिदमाक्षिपसि माम् दुर्जन !

उत्+ क्षिप् (उत्प्रेरणम्) काष्ठकारः काष्ठमुत्क्षिपति । पुष्पमाकाशमुत्क्षिपति ।

सम्+ क्षिप् संक्षेपणम्) सः पाठान् संक्षिपति ।

गम्लृ (गतौ)

आ+गम् सः गृहमागच्छति । ते सद्यः आगमिष्यन्ति ।

निर्+गम् बालकः गृहात् निर्गच्छति ।

सम्+ गम् शकुन्तला सखिभिः सङ्गच्छते । अनेन भाष्यवचनं सङ्गच्छते ।

उद्+ गम् पक्षिणः उदगच्छन् । विमानः आकाशे उद्गच्छति ।

प्रति+आ+गम् वधूः गृहं प्रत्यागच्छति ।

अधि+ गम् सः धनमधिगच्छति । सा समचितं वरमधिगच्छति ।

चर् (गतिभक्षणयोः)

प्र+चर् लोके रामायण कथा प्रचरिष्यति । सत्कर्मशीलस्य सुयशः प्रचरति ।

आ+चर् प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् । सः मित्रवत् आचरति शत्रून् ।

अनु+चर् अनुचरति शशाङ्कं राहुदोषेऽपि तारा । भवान् सन्मार्गमनुचरतु ।

वि+चर् भिक्षुः विहारे विचरति ।

सम्+चर् जनाः अनेन मार्गेण सञ्चरन्ते । अत्र छात्राः सञ्चरन्ते ।

चिञ् (चयने)

आ+चि सः विस्तरणेन शय्यामाचिनोति ।

निस्+चि वयम् सत्यं विनिश्चिनुमः ।

अव+चि सा उद्यानात् कुसुमानि अवचिनोति ।

वि+निस्+चि हर्षस्य वा शोकस्य विषयोऽयं नाहं विनिश्चिनोति ।

तॄ (प्लवनतरणयोः)

उत्+तृ जले काष्ठमुत्तरति । सः कौशिकीमुदतरत् ।

उत्+तॄ	छात्रः प्रश्नान्नुत्तरति ।
वि+ तॄ	गुरुः ज्ञानं वितरति । दयालुः दीनेभ्यः धनम् वितरति ।

दिश (दाने)

आ+दिश् गुरुः शिष्येभ्यो आदिशति । सचिवः कर्मकरान् आदिशति ।
सम्+दिश्	सः सत्यं सन्दिशति गुरुन् ।
निर्+ दिश्	सा मार्गं निर्दिशति । माणवकः गृहं निर्दिशति ।
उप+ दिश्	गुरुः जनान् उपदिशति । माणवकः धर्ममुपदिशति ।

दा दाने

प्र+दा	सः रूप्यकाणि माम् प्रददाति ।
आ+दा	सः पुरस्कारमाददाति । नादत्ते प्रियमण्डनापि भवता... (शाकुन्तले) ।
वि+आ+दा	व्याघ्रः मुखं व्याददाति ।

डुधाञ् (धा) धारणपोषणयोः)

सम्+धा (सन्धिकरणम्)	बलिष्ठः शत्रुः सन्दध्यात् ।
अधि+धा द्वारं पिधेहि व्याघ्रः समागतः ।
अव+धा	समीरः पठने नावधत्ते । (ध्यानं नददाति)
वि+धा	अदेङ् गुणः सूत्रेण अ ए ओ वर्णानां गुणसंज्ञा विधीयते ।
नि+धा	सत्यस्य रूपं निहितम् गुहायाम् ।
परि+धा	सा नवीनमङ्गुलीयकम् परिदधाति । सा नवीनानि वस्त्राणि परिदधाति ।

नी (नये)

प्र+नी	जेम्सवाटः महोदयः रेलयानं प्रणिनाय ।
अप+नी	सः मित्रस्य खेदमनयति । सूर्यः अन्धकारमपनयति ।
अनु+नी	सः गुरुम् पाठनाय अनुनयति । सः मित्रम् सहयोगायानुनयति ।
अभि+नी सः	नाटके सुन्दरमभिनयति सरोजः । कलाकारः भावानुकूलमभिनयति ।
उप+नी	आचार्यः बालकमुपनीय वेदमध्यापयति ।
वि+नी	वणिजः करं विनयते ।
वि+नी	देवदत्तः शतं विनयते । सः वस्त्रक्रयणाय सहस्रं रूप्यकाणि विनयते ।
उद्+नी	सः दण्डमुन्नयते । सत्पुत्रः कुलमुन्नेष्यति ।

पत्लृ (पतने)

प्र+पत्	पर्वतात् जलं प्रपतति । रुग्णः रामः धावन् मार्गे प्रपतिष्यति ।
प्र+नि+पत्	कृतदीक्षः मन्दारः गुरुचरणयोः प्रणिपतति ।
आ+पत्	हा ! कष्टमापतितम् !
नि+पत्	खले कपोताः युगपत् निपतन्ति । युद्धे वाणाः निपतन्ति ।

भू (सत्तायाम्)

प्र+भू	हिमालयात् गङ्गा प्रभवति । पर्वतात् नद्यः प्रभवन्ति ।

| | |
|---|---|
| परा+भू | वीरः शत्रून् पराभवति। |
| सम्+भू | धर्मसंस्थापनार्थाय सम्भवामि युगे युगे। |
| अनु+भू | ते दुःखमनुभवन्ति। |
| अभि+भू | माधवः युद्धे कदापि नाभिभविष्यति। |
| मन्त्र् (गुप्तभाषणे) | |
| आ+मन्त्र् | बान्धवाः माम् भोजनाय आमन्त्रयन्ति। अहं गुरुमामन्त्रयामि। |
| नि+मन्त्र् | ब्राह्मणान् निमन्त्रयतु यज्ञार्थम्। |
| अभि+मन्त्र् | सः जलम् अभिमन्त्रयति। ते तण्डुलान् अभिमन्त्र्य क्षिपति। |
| रमु (क्रीडायाम्) | यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। |
| वि+रम् | दुष्टः पापात् न विरमते। भो ! विरम पापात्। |
| आ+रम् | छात्राः उद्यो आरमन्ति। रमणी गृहेषु आरमन्ति। |
| वस (निवासे) | |
| उप+वस् | सः गुरोः सकाशमुपवसति। |
| उप+वस् | विष्णुप्रियाः एकादश्यामुपवसन्ति। |
| आ+वस् | हरिः वैकुण्ठमावसति। ते ग्राममावसन्ति। |
| नि+वस् | ते धनिकाः काष्ठमण्डपे निवसन्ति। त्वं कुत्र निवससि ? |
| अधि+वस् | शिवः कैलाशमधिवसति। |
| वह (प्रापणे) | |
| प्र+वह् | तत्र कौशिकी नदी प्रवहति। कौशिक्याः प्रवाहवत् तस्य वाणी प्रवहति। |
| उद्+वह् | रामः सीतामुदवहत्। कृष्णः रुक्मिणीमुदवहत्। |
| आ+वह् | अभुक्तं धनम् सुखं नावहति। ते कार्यालयस्य कार्यभारमावहन्ति। |
| निर्+वह् | स कार्यं निर्वहति। |
| वृतु वर्तने | |
| प्र+वृत् | ते सत्कमर्णि प्रवर्तन्ते। |
| परि+वृत् | चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च। |
| नि+वृत् | कृषकः वनात् निवर्तते। |
| आ+वृत् | सः सद्यः पाठमावर्तते। |
| स्था (गतिनिवृत्तौ) | |
| प्र+स्था (तिष्ठ) | मुनिः आश्रमं प्रतिष्ठति। सः वनं प्रतस्थे। |
| उत्+स्था (तिष्ठ) | भो गोविन्द ! उत्तिष्ठ कार्यं कुरु। |
| उप+स्था | उपतिष्ठति सचिवः राज्ञः समीपम्। कौशिकी गङ्गामुपतिष्ठते। |
| हृञ् (हरणे) | |
| प्र+हृ | सः लगुडेन त्वाम् प्रहरति। इन्द्रः वज्रं प्रहरति। |
| अप+हृ | चौरः धनमपहरति। कृष्णः जनानां कलुषितं मनोभावमपहरति। |

| | |
|---|---|
| सम्+हृ | शिवः संसारं संहरति । |
| आ+हृ | पाचकः आहरति पात्राणि । (आनयति) सः भोजनमाहरति । (खादति) |
| उत्+हृ | शिवः भक्तान्नुद्धरति । गुरुः विद्यां प्रदाय शिष्यान्नुद्धरति । |
| उत्+आ+हृ | दीक्षितः कार्यमुदाहरति । गुरुः उदाहृत्य पाठयति पाठम् । |
| वि+हृ | भिक्षुकाः नगरं विहरन्ति । राजा वनं विहरति । |

## ५. निष्कर्षः

पदवर्गः प्रथमतो नाम आख्यात रूपेण द्विधा विभक्त आसीत् । अत्र नामपदेन नाम सर्वनामाव्ययपदानि ज्ञायन्ते । आख्यातपदेन च क्रियापदं बोध्यते । पाणिनेः "सुप्तिङन्तम् पदम्" (पा. सू.१।४।१४) इति सूत्रेण तदेवावबुध्यते । सुप् प्रत्ययान्तानि नाम सर्वनामाव्ययपदानि तथा च तिङन्तपदेन तिङ्प्रत्ययान्तानि क्रियापदानि गृह्यन्ते । वेदे 'चत्वारि वाक् परिमिता पदानि' इत्युक्त्वा पतञ्जलिः नामाख्यातोपसर्गनिपाताः पठिताः । अतः पदविभागेषु प्रसिद्धः उपसर्गः प्राचीनतः प्रचलितः इदानीं यावत् तेनैव नाम्ना प्रसिद्धः पदराशिः गम्यते । एते क्रियायोगे एव उपसर्गतां भजन्ते, क्रियायोगाभावे तु निपातपदतामावहन्ति । उपसर्गाणां स्वतन्त्रस्यार्थस्याभावो भवति, एते धातोरर्थं द्योतयन्ति । उपसर्गाः निपाताः धातवश्चानेकार्थाः स्मृताः सन्ति ।

धातवश्चोसर्गाश्च निपाता इति ते त्रयः । अनेकार्थाः स्मृताः सद्भिः ... [३१]।

धारणपोषणाथर्केन धातुशब्देन भू पठ् इत्यादयः क्रियावाचिनः बोध्यन्ते । धातवः धातुपाठे पठिताः पाठक्रमेणैव भ्वादि, अदादि, जुहोत्यादिषु दशगणोषु विभक्ताः सन्ति । एते गणपठिताः मूलधातवः सन्ति । धातोः प्रातिपदिकात् वा विशेषार्थप्रकटनाय सनादिभिः प्रत्ययैः निष्पन्नो धातु व्युत्पन्नधातुर्निगद्यते । धातोः कर्तरि कर्मणि भावे च लकाराः विधीयन्ते । कर्तरि लकारे कर्तृवाच्यस्य क्रियापदानि, कर्मणि लकारे कर्मवाच्यस्य क्रियापदानि, भावे लकारे भाववाच्यस्य क्रियापदानि व्युत्पन्नानि भवन्ति । कर्तरि कर्मणि भावे च विहितानां लकाराणां स्थानेऽष्टादश तिङ्प्रत्ययाः भवन्ति । धातोः तिङ्प्रत्ययस्य च मेलनेन निष्पन्नत्वात् एतादृशानि पदानि तिङन्तपदानि चोच्यन्ते । आख्यातं क्रियापदं चैतेषामपरं प्रसिद्धं नाम वर्तते । धातवः उपसर्गयोगन विशिष्टमर्थं प्रकटयन्ति । सोपसर्गपदप्रयोगेण भाषा च परिष्कृता तथा सारल्येन विशिष्टभावाभिव्यक्तये च क्षमा भविष्यति । विशिष्टार्थप्रतिपादनायानेकैः धातुभिरनेके उपसर्गाः संयुक्ताः भवितु शक्नुवन्ति । संस्कृतभाषायामनेकानि क्रियापदानि सोपसर्गात्मकानि विद्यन्ते ।

### सन्दर्भग्रन्थसूची

कालिदासः, (सन् २०१०), *अभिज्ञानशाकुन्तलम्,* नवकिशोरकरशास्त्री (संस्कृतव्याख्या), वाराणसी : चौखम्बा अमरभारती प्रकाशनम् ।

त्रिपाठी, डा.हरिश्चन्द्रमणिः (२०४६), *निपातार्थनिर्णयः*, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालयः प्रकाशनम् ।

३१ *निपातार्थनिर्णयः पृ. ४४ ।*

दीक्षितः, भट्टोजी (सन् १९९६), *वैयाकरणसिद्धन्तकौमुदी* (व्या.गोपालदत्तपाण्डेयः), वाराणसी : चौखम्बा सुरभारती प्रकाशनम् । (बालमनोरमासहिता) (प्रथमः, द्वितीयः, तृतीयः, चतुर्थः भागाः) ।

,, (२०५८), *वैयाकरणसिद्धान्तकौमुदी,* (व्या.बालकृष्ण पञ्चोली), (पञ्चमसं.) वाराणसी : चौखम्बासंस्कृतसंस्थानम्,। (प्रथमः, द्वितीयः, तृतीयः, चतुर्थः भागाः)

,, (सन् १९९८), *प्रौढमनोरमा* (शब्दरत्नसहिता), वाराणसी : चौखम्बासुरभारती प्रकाशनम् ।

द्विवेदी, कपिलदेव (सन् १९९०), *संस्कृतनिबन्धशतकम्* (प.सं.), वाराणसी : विश्वविद्यालय प्रकाशनम्।

नौटियालः, चक्रधरः हंसः (सन् १९८८), *बृहद् अनुवाद चन्द्रिका,* दिल्ली : मोतीलाल बनारसीदासः ।

पतञ्जलिः, (सन् १९८७), *महाभाष्यम्,* (आ.१-३), दिल्ली : चौखम्बा संस्कृत प्रतिष्ठानम् ।

पाणिनिः, (सन् १९९७), *अष्टाध्यायी* (तृ.सं.), वाराणसी : चौखम्बा सुरभारती प्रकाशनम् ।

भट्टः, कौण्डः (२००४), *वैयाकरणभूषणसारः* (प्र.सं.), (व्या.बालकृष्ण पञ्चोली) वाराणसी : आदर्श ग्रन्थमालाप्रकाशनम् ।

भर्तृहरिः, (सन् १९८८ ), *वाक्यपदीयम्* (तृ.का.), वाराणसी : चौखम्बा विद्याभवनम् ।

भर्तृहरिः, (सन् १९९० ), *नीतिशतकम्* वाराणसी : चौखम्बा सुरभारती प्रकाशनम् ।

यास्कः, (सन् २००२), *निरुक्तम्,* दिल्ली : चौखम्बा संस्कृत प्रतिष्ठानम् ।

सुवेदी, कपिलदेव (सन्२०१५), *प्रौढरचनानुवादकौमुदी* (२२ सं.), वाराणसी :विश्वविद्यालय प्रकाशनम्।